नं० ४६७० - १

ऋषिपंचमी व्रतोद्यापनम्

पत्राणि ५ (पञ्च)

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४६६०-घ

ऋषिपंचमीव्रतोद्यापनम्

नं० ४६७०-घ
पत्राणि ५

© Dharmartha Trust J&K. Digitized by eGangotri

दी। श्रीपादेवनीपोत्ती

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ श्रीगणेशाय नमः। ऋषीपंचमीव्रतोद्यापनविधिर्लिख्यते। पूर्वं नियमं गृहीत्वा मं
त्रः। अद्याहं ऋषिपंचम्याः करिष्ये व्रतमुत्तमं। ऋषीणां तु प्रसादेन निर्विघ्नेन समाप्यतां।
पूर्वदिवसे उपोष्य। अपरेद्युः व्रतानुष्ठानाय नित्यनैमित्तिकानुष्ठानं सर्वं निर्वर्त्य।
अपामार्गादिभिः दन्तधावनपूर्वकं। पुरुषसूक्तोक्तविधिना स्नानं। पश्चाद्गोमयेनोप
लेपिते शुभे देशे रंगवल्लिसमायुक्तनानापुष्पोपशोभितां सम्यग्वेदीं रचयित्वा त
त्र सप्तपद्माष्टदलानि रचयित्वा सर्वतोभद्रमंडलमिति केचिदाहुः। ततः आचार्या
दीनां पादप्रक्षालनं। तस्यायं विधिः। आचमनं प्राणायामः। स्वस्त्ययनं। सुमुखश्
चे॰ अद्येत्यादि॰ ऋषिपंचमीव्रतोद्यापनप्र॰ आचार्यादीनां पादप्र॰ ष्ये।
स्वागतं ते॰ आचार्यादीनां पादप्रक्षालनं। ततो वरणं श्राद्धं। गोत्रं शर्माणं आचा १
र्यं वृणे। व्रतोऽस्मि। युष्मांश्चाप्य नवृणे। व्रतास्मः। ततो दानखंडोक्तमद्रस्वस्ति
वाचनं। आशीर्वादः। अस्य यागस्य॰ मंडलाग्रे उपविश्य। आचमनादि अद्येत्या॰
ऋषि॰ व्रतो॰ परिग्रहार्थं नरक्षार्जादि सप्तऋषीणामरुंधतीसहितानां स्का
[illegible] प्रतिमानामग्न्युत्तारणं।

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible] तमेतेन तत्कर [illegible]
दिक्पालकारयुक्तेषु नरवाजादीन्वस्त्रयुग्मैः समाहृतान्कलशेषु संस्थाप्य । प्रतिष्ठापनं ।
ततः षोडशोपचारैः पंचोपचारैः पूजामाचरेत् । तत्र मंत्राः । अथ ध्यानं । कश्यपोऽत्रिर्भरद्वाजो
विश्वामित्रोऽथ गोतमः । जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः । मूर्त्तिर्ब्रह्मण्यदेवस्य ब्रह्म
णस्तेजमुत्तमं । सूर्यकोटिप्रतीकाशं ध्यायामि ऋषिसंचयं । वन्यादिशाकाहारमानीय
पुरस्तात्पायिचारणधान्यमुष्टीसंस्थाप्य पूजा । पुरुषस्वेदं मंत्रः । ऋषिर्विप्रः ० नाऽइ
२० द्दांगन्यासः । यथा देहे तथा देवे न्यासः । आवाहयाम्यत्र मुनीन् सर्वज्ञानविशारदान् ।
ज्यां सर्वलोकस्य व्रतसांकुल्यकारणात् । आगच्छंतु महाभागाश्चातुर्वेदस्वरूपिणः ।
यावद्व्रतमहं कुर्वे तावत्तिष्ठंतु मे । इत्यावाहनं । सुवर्णघटितं दिव्यं नानारत्नसमन् १
तं । आसनं कल्पितं यन्मे गृह्यतां तन्मुनीश्वरः । ऋग्यजुःसामगानां च स्वरूपेभ्यो नमो न
पुराणपुरुषेभ्यो हि आसनं प्रददाम्यहं । आसनं । गंगाजलं समानीतं सुगंधिद्रव्यसंयु
पाद्यं गृह्णंतु विप्रेंद्राः कश्यपाद्या महर्षयः । प्रसादं कुरुत प्राज्ञास्तुष्टाः संतु समा
गंधपुष्पाक्षतैर्युक्तं पाद्यं गृह्णंतु नो जनाः । इति पाद्यं । सुवर्णपात्रे रत्नाढ्ये गंधपुष्प

© Dharmartha Trust J&K. Digitized by eGangotri

...महासत्तर्षयश्च गृह्णन्तु दत्तमर्घ्यं नमोस्तु ते। अनन्तसंस्थस्वरूपं च व्योमवर्तिमृषिसंचयं। द...
...पापं तु मे सर्वं अर्घ्यं गृह्णन्तु वै नमः। अर्घ्यमंत्रः। कर्पूरवासितं तोयं सुवर्णकलशोस्थितं। ददाम
मनं नक्त्या ऋषीणां प्रीतये सदा। लोकानां तु हितं दाता रोग्यं सर्वं तपोधनाः। नमो धर्मनि
नेभ्यो महर्षिभ्यो नमो नमः। इत्याचमनं। सुवर्णपात्रे रत्नाढ्ये वस्त्रालंकरणादियत्। मधु
पर्कं मानीतं ऋषयः प्रतिगृह्यतां। ~~कोटिसूर्यप्रनं दिव्यं नवतंतुविनिर्मितं~~। इति मधुपर्कः
मंदाकिनी गौतमी च यमुना च सरस्वती। तापी च नर्मदा तोयैः स्नानं कुर्वन्तु तापसाः। स्नान
म्। सूक्ष्माण्यतीवशुभ्राणि वस्त्राणि विविधानि च। करप्रपाद्या महर्षयः प्रतिगृह्णन्तु वो नम
सर्वे नित्यं तपोनिष्ठाः ब्रह्मज्ञाः सत्यवादिनः। वस्त्राणि परिगृह्णन्तु प्रीतिदाः संतु मे सदा। वस्त्र
मंत्रः। मानोत्तरसमुद्भूतं त्रिवृद्यद्ब्रह्मसूत्रकं। प्रत्येकं तत्प्रयच्छामि ऋषयः प्रतिगृह्यतां। को
ग टिसूर्यप्रनं दिव्यं नवतंतुविनिर्मितं। उत्तरीयं चोपवीतं गृह्णन्तु ऋषिसत्तमाः। यज्ञोपवीतं
मलयोत्थं महादिव्यं सुगंधद्रव्यसंयुतं। चंदनं वः प्रयच्छामि ऋषीणां भावितात्मनां। श्रीखं
डं चंदनं दिव्यं मलयाद्रिसमुद्भवं। लेपनं च सुरश्रेष्ठाः प्रीयतामृषिसत्तमाः। इति चंदनं। र
सुगंधाः सत्तुला विप्राः अतिशुभ्रा मनोहराः। अक्षतार्थं प्रयच्छामि तद्गृह्णन्तु मुनीश्वराः।
© Dharmartha Trust J&K. Digitized by eGangotri
...न पत्रं ...तिप... मालतीकुसुमैः ... पारिजाथ तत्प्रयच्छामि त... गृह्णन्तु मुनी

...स्तु गोत्राणि मे स्थादीनि विप्रन्तो। मया हृतानि पृष्ट्याऽऽतोइ... अर्घं प्रति
गृह्यतां। ऋषीणां विशेषतः पृथक् पूजनमंत्राः। मरिचये नमः। अदित्ये नमः। कश्यपः
सर्वलोकाढ्यः सर्वभूतेषु संस्थितः। नराणां पापनाशाय कद्रुरूपेण तिष्ठति। कश्यप
य नमः। अदितये। ब्रह्मणे। ब्राह्मण्ये। अत्रये तु नमस्तुभ्यं सर्वभूतहितैषिणे। तप
रूपाय सत्याय ब्रह्मणे मित तेजसे। अत्रये। अनुसूयायै। बुधाय। गविष्ठिराय। बृ
हस्पतये। तारायै। भरद्वाज नमस्तेऽस्तु सदाध्ययनतत्परः। महाजटिल धर्मात्मिन् पा
पं संहर मे सदा। ऋचीकाय। भरद्वाजाय। शांतायै। गाधिने। विश्वायै। विश्वामित्र न
मस्तुभ्यं ज्वलन्नमुखमहाव्रत। अध्यात्मीकृतगायत्री तपोरूपेण संस्थितः। विश्वामित्रा
य। मधुच्छंदसे। रक्तगणाय। सत्यायै। गोतमः सर्वभूतामृषीणां च महाप्रियः। श्रो
तानां कर्मणां चैव संप्रदायप्रवर्त्तक। गोतमाय। अहल्यायै। वामदेवाय। भार्गवा
य। भृगुपत्न्यै। जमदग्निर्महातेजा तपसा ज्वलितः ध्रुवं लोकानां सर्वसिध्यर्थं सर्वपा
पं निवर्त्तय। जमदग्नये। रेणुकायै। परशुरामाय। मित्रावरुणाभ्यां। वसतीवर्यै। न
मस्तुभ्यं वसिष्ठाय जटिलाय महात्मने। धर्मरूपाय सत्याय लोकानां हितकारिणे।
© Dharmartha Trust J&K. Digitized by eGangotri
वसिष्ठाय। अरुंधत्यै। शक्तये। पराशराय। अरुंधती नमस्तुभ्यं महापापौघनाशि

नैवेद्यपानि भूतानी सर्वासां धर्मशील प्रवर्त्तकौ। अरुंधत्यै। इंद्रादिदिक्पालानां सृजनं। कृष्णागु
रु गुग्गुलं च सुगंधं चंदनं तथा। कश्यपादिमुनीनां तु धूपार्थं दीपयेम मा। इति धूपं। सुवर्त्ति
घृतसंयुक्तं अंधकारविनाशनं। निराजनं च विप्रेभ्यो युष्मभ्यं च निवेदितं। इति दीपमंत्रः।
स्वादुयुक्तानि सर्वाणि सुपथ्यानि मृदूनि च। शर्करा घृतयुक्तानि नैवेद्यानि कृतानि च।।
नैवेद्यं गृह्यतां विप्रा भक्तिं मे अचलां कुरु। ईप्सितं मे वरं देहि परत्र च परां गतिं। नैवेद्यं।
उच्छिष्टोदकं शुद्धिकरं शीतलं जलमुत्तमं। गृह्णंतु मुनयः सर्वे हस्तोद्वर्त्तनकं तथा। इति
करोद्वर्त्तनं। नालिकेरं च कूष्मांडं मातुलिंगं फलानि च। मयार्पितं मुनीशेभ्यः फलानि प्र
तिगृह्यतां। इति फलं। पूगीफलं सकर्पूरं नागवल्लीदलैर्युतं। नानागुणैर्युतं विप्रास्तां
बूलं प्रतिगृह्यतां। इति तांबूलं। नमो वो वेदविद्भ्यो नमो वो धरणीधरभूसुराः। नमो
व ऋषिसंघाश्च वेदवेदांगपारगाः। नमस्कारः। यानिकानि। इति प्रदक्षिणा। हिर
ण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे। इति द ३
क्षिणा। अथ स्कंधार्घः। सप्त ऋषयो महाभागा मानसा ब्रह्मणः सुताः। अर्घं गृह्णंतु मे
दत्तं कामं यच्छंतु मे सदा। पतिप्रिये पतिप्राणे सुखसौभाग्यदायिनी। गृहाणार्घं मया द
त्तं अरुंधती नमोस्तु ते। जन्ममध्ये त्वयैके विद्रुजो दोषा संभवेति ते। इष्टानामष्टु

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible] जाप [illegible] ऋषय [illegible] ल्याः [illegible] इजितानक्ति [illegible]
णार्घं नमोऽस्तु ते ॥ नन्तस्य शुक्लपंचम्यामर्चितं ऋषिसत्तमं । दग्धपापं तु मे देव गृहाणार्घं
नमोऽस्तु ते ॥ नमोऽस्तु ऋषिसंघाय नमो ब्रह्मपराय च । इजितानक्तिभावेन गृहाणार्घं मया
र्पितं ॥ नमो ऋषिभ्यः सप्तभ्यः सर्वेषां चिंतितप्रदा ॥ इजितानक्तिभावेन गृहाणार्घं मया
दितं ॥ कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः । जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः
स्मृताः ॥ गृह्णंत्वर्घं मया दत्तं तुष्टा भवंतु सर्वदा ॥ इत्यर्घमंत्राः ॥ ततो जापकास्स्वस्त
यनशांतिपाठराद्धोऽग्निं जपेयुः ॥ ततः स्वगृह्योक्तविधिना तिलसर्पिःपायसदूर्वा
भिः ऋषिमंत्रेण अष्टोत्तरशतसंख्याको होमः कार्यः ॥ पुण्याहमित्यादि ॥ प्रथमं ब्रा
णभोजनसंकल्पः ॥ अद्य मया आचरितस्य ऋषिपंचमीव्रतस्य सांग० र्थं सप्तऋषीणा
मरुंधतीसहितानां प्री० र्थं दास्यमानां गां यथोप० तां आचार्याय० दे ॥ अन्यानि यथा
शक्ति दानानि ॥ अस्य ऋषिपंचमीव्रतोद्याप० र्थं अरुंधती० र्थं इमां वंशपात्रीमां
जिष्ठरंजितवस्त्रसहितां कुंकुमकज्जलादि अलंकारसहितां गंध० तां यथा स्वैकस्यै
सुवासिन्यै अहं० सं दा ॥ आरात्रिकं ॥ श्रेयसी संकल्पः ॥ दक्षिणाः पा० ॥ प्रार्थना ॥ प्र
जनीयाश्च सतु ऋषयः सर्वे [illegible] सर्वान् ऋषीन् भक्तिसमन्वितः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

इमे सप्तर्षयः प्रीताः सन्तु पापप्रणाशनाः। अस्माकं पुण्यदाः सन्तु समीहितफल
प्रदाः। जानताजानता वापि नूनं पूजा मया कृता। संपूर्णं जायते सर्वं युष्मद्दयाव
लोकनात्। मानसं वाचिकं चैव कायिकं यच्च दुष्कृतं। तत्सर्वं विलयं याति सप्तर्षी
णां प्रहर्षि प्रसादतः। इति प्रार्थना। अस्य ऋषी० कर्मणो० स्फ्का। ततः सप्त ब्राह्मण
न् भोजयेत्। तेभ्यः सदक्षिणान् कलशान् दद्यात्। तेषां दान प्रतिग्रह मंत्राः। प्रा
ति गृहाण विप्रेन्द्र समस्तफलदायक। कश्यप त्वं हि नूनं तेषु वर्त्तसि पापना
शाय। इति दानमंत्रः। कश्यप स्तारको नान्यो कश्यपाय नमो नमः। प्रतिग्रह मं
द्वि गृहाण त्वं मुनिश्रेष्ठ समस्तफलदायक। भरद्वाजन्नमस्तेऽस्तु अत्रिरूपेण वे नित्यं
वेद वेदांग पारग। दानमंत्रः। अत्रिं च प्रतिगृह्णामि सर्व्वत्र तहिते विप्रो। अत्रिश्च ता
रको नान्यो मन्त्रयेचन नमो नमः। प्रतिग्र०। प्रतिगृह्ण द्विजश्रेष्ठ समस्तफलदाय ४
क। भरद्वाज नमस्तुभ्यं जटारूपेण तिष्ठति। दान०। भरद्वाज गृहाण त्वं ध्यानरूपं
परायणं। एव तारको नान्यो भरद्वाज नमोस्तु ते। प्रतिग्र०। गृहाण त्वं द्विजश्रेष्ठ
समस्तफलदायक। विश्वामित्र नमस्तुभ्यं ब्रह्मरूपेण तिष्ठति। इति दान०। रे
त्वं च प्रतिगृह्णामि श्री [illegible] एव तारको नान्यो विश्वामित्र

© Dharmartha Trust J&K. Digitized by eGangotri

नमोऽस्तुते।प्रतिग्र०।गृह्णामि एवं द्विज० क।गौतमस्त्वं हि लोकानां वेदमार्गप्रवर्त्त
क।दान०।गौतमः प्रतिगृह्णामि सर्वपापनिवर्त्तक।गौतमस्तारको नान्यो गौतमा
यनमो नमः।प्रतिग्र०।गृह्णाणार्घ्यं०क।जमदग्ने सि त्वं नित्यं लोकानां हितकारक
दान०।ऋषिं च प्रतिगृह्णामि जतपसार्जितविश्वक।स एव तारको नान्यो जम
दग्नयेनमो नमः।प्रति०।गृह्णाणार्घ्यं०क।वसिष्ठस्त्वं हि सर्वत्र तपोरूपेण तिष्ठ
ति।प्रदान०।वसिष्ठं प्रतिगृह्णामि सर्वदुष्कृतनाशनां।वसिष्ठस्तारको ना
न्यो।वसिष्ठायनमो नमः।प्रति०।अरुन्धती नमस्तुभ्यं महापापौघनाशनी।प
पतिव्रतानां सर्वासां धर्मशीलप्रवर्त्तके।दान०।प्रार्थना।रजोदोषादिकं
पापं व्यपोहत्स्व सदा मम।व्रतं निर्वर्त्तितं किं सांगं त्वमद्य मुनिपुंगवाः।यत्त्वत्
दुष्कृतं तन्मे व्यपोहंतु सदा मम।अभिषेक आशीर्वादः।इति ऋषिपंचमी
व्रतोद्यापनविधिः समाप्तः।।[redacted]समाप्तः।

© Dharmartha Trust J&K. Digitized by eGangotri

५

श्री-श्रीवादेवनेविभागे

श्रीपंचमीव्र

तोद्यापनाविधिः पद्धतिः

© Dharmartha Trust J&K. Digitized by eGangotri